ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218 **PP. NO.- 291-293**
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- II, Issues-28, YEAR- April-June-2023

# उपनिषत्सृष्ट्या वैज्ञानिकत्वम्

**डॉ0** महेश कुमार द्विवेदी
सहाचार्य, श्रीएकरसानन्द– आदर्शसंस्कृतमहाविद्यालयः मैनपुरी (उ०प्र०) भारत

**Received-16.06.2024** **Revised-23.06.2024,** **Accepted-29.06.2024** **E-mail: maheshd942@gmail.com**

***सारांश:*** ***सन्ति इहलोकपरलोकसाधनीभूता नैका उपनिषदः। समुपलब्धवेदमूलं शिष्टाचारानुमितवेदमूलं वैदिकदर्शनानामाधारभूतं वा प्रमाणमुपादाय तदन्तिमाध्यायरूपेण महर्षिभिः एताः प्रकाशिताः। वेदभागस्य महतोंशस्य ब्राह्मणस्येदानीमनुपलब्धत्वात्तत्रोक्तानुष्ठान–भेदानां ज्ञातुमशक्यतया मोहरागाबद्धजनानां संसारपारं कर्तुं समर्थानां मानवानां समुद्धाराय दयालुर्भगवान् वेदगाम्भीर्यं प्रकाशयितुं नानाविधार्थ–समन्वितान् ग्रन्थान् धृत–कपिल–जैमिनीव्यास–नारदादिरूपः प्रणीतवान्।***

***कुंजीभूत शब्द– उपनिषत्सृष्ट्या वैज्ञानिकत्वम्, सन्ति इहलोकपरलोकसाधनीभूता नैका उपनिषदः, मोहरागाबद्धजनानां, समुद्धाराय।***

अत्र कर्मकाण्ड–उपासनाकाण्डौ अध्यात्मभागश्चेति प्रमुखाः। कर्मकाण्डो जैमिनिना साधूपात्तः। अध्यात्मभागः उपनिषद्भिर्विहितः। अतस्तासां वेदमूलकत्वात् प्रामाण्यमक्षुण्णम्। ताश्च सर्वाः अपरोक्षसुखसाधिकाः परोक्षस्वर्गादिपोषिदकाः पुण्यपापरूपफलाः च भक्ष्याभक्ष्य–गम्यागम्यविषययुताः च उपनिषदो वेदनिहितार्थप्रकाशका न तु अपूर्वाः तथा हि–

''इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न वा।
योऽस्याध्यक्षः परमेव्योमन्त्सो अङ्ग वेद यदि वा न वा।''[1]

''अनन्तवेदा जगदेकमिष्यते न वेदतोऽन्यव्यक्तिमपीह दृश्यते'' द्वयाङ्गमयं दृश्यमिदं स वेदः – यद्दृश्यते खल्वास्माकं समस्तं संस्कृतवाङ्मयं तत्तु सर्वं वेदपदेनाभिधीयते। ब्रह्म–विद्या–वेदेत्येषां समाहारः उपनिषच्छब्दः विविधरूपेण सृष्टिसंरचनां निगदति तथाहि–

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एष विष्णुः स प्राणः स कालोऽग्निःस चन्द्रमाः
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्।।[2]

एतैः प्रणाणैः ज्ञायते यद्भूतं यत्सर्वं हि जगतीतले प्रतिभासते तत्तु मूलतः वैदिकमेव। श्रुतीनां सारसिद्धान्तभूतानाम् उपनिषदामपि अस्ति कश्चन विशेषः सृष्टिक्रमः। स्मार्ता सृष्टिदिशा तु अव्यक्त एव स्वयम्भूरासीत्। सो हि सृष्टेर्विकासाय आत्मानं हिरण्यगर्भात् ब्रह्मारूपेण प्रकटयामास। स्वयम्भूः ब्रह्मा नरनारी द्विधा विधाय सृष्टेः विश्वात्मिकां प्रक्रियां समारब्धवान्। तथा हि–

ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः।
देवेभ्यस्तु जगत्सर्वं चरं स्थाणुवनुपूर्वशः।।[3]
यदा पश्यःपश्यते रुक्मवर्ण,कर्तारमीशं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय, निरञ्जनः परमं साम्यमुपैति।।[4]

एवङ्क्रमानुसारेण ब्रह्मा, मनुः, ऋषिश्च सृष्टाः। प्रथमं अर्धनारीश्वरात् विराड् जातः तस्मात् मनुर्जायत्। मनुदिशा ऋषीणां तदनु पितृणां प्राथम्यं स्पष्टमेव। प्रथमं पितरः तदनन्तरं तेषामानुवंशिकपरम्परा तस्याश्च वयमनुस्यूताः स्मः।

वैदिकीसृष्टिप्रक्रिया आधुनिकविज्ञानेषु उपजीव्यत्वेन गृह्यते। ऋग्वेद– यजुर्वेद– सामवेद– अथर्ववेद– ब्राह्मणारण्यकोपनिषद्– कल्पसूत्र– ग्रन्थान्तर्गतसृष्टिनिर्वचनमुपलभ्यते तथाहि– उपनिषदि–

ते ध्यानयोगानुगता अपश्यन्, देवात्मशक्तिं स्वगुणैर्निगूढाम्।
यः कारणानि निखिलानि तानि, कालात्मयुक्तान्यधितिष्ठत्येकः।।[5]

एवं मानवाः सृष्टिरूपेण चतुर्दश विद्यन्ते। तदेव परब्रह्म, ब्रह्मा, शिवः, इन्द्रः, विष्णुः प्राणः कालाग्निचन्द्रमाश्च वर्तन्ते। स्वायम्भुवः, स्वारोचिषः, औत्तमिः, तामसः, रैवतः, चाक्षुषः, वैवस्वतः सावर्णिः दक्षसावर्णिः, ब्रह्मासावर्णिः, धर्मसावर्णिः इत्यादयः। ब्रह्मा तु मानवरूपधारी एव विभाति। तस्य ब्रह्मणः मुखं ,बाहु, उरू पादौ च सन्ति। ब्रह्मैव ध्यानेन ब्रह्माण्डं द्विधा कृतवान्। द्यौः भूमिः दिशः तयधिः इत्येतेषां निर्माणं तेन प्रवर्तितम्। तथा हि सृष्टिरियं द्वन्द्वात्मिकी, सुखदुखमयी च। तपः, वाक्, रतिः, कामः,क्रोधः इत्यादीन् ब्रह्मणा प्रयोजितानि।

स्वयम्भुवोर्भगवतो मानसी– मैथुनी– भौतिकी– प्राणसृष्ट्यश्चोत्पद्यन्ते। ब्राह्मणग्रन्थे उपनिषदि च सृष्टिविषये केचन सिद्धान्ताः – सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[6]

तदैक्षत बहु स्यां प्रजायेयेति ''प्रजापतिस्त्रेवेदं सर्वमसृजन् यदिदं किं च''

पुरुषश्चक्रे द्विपदः,पुरुषश्चक्रे चतुष्पदः।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्।।[7]

आनन्द–विज्ञान–मनः–प्राण–वाग्रूपः पञ्चकलाविभूषितः प्रजापतिपुरुषः तथा आनन्दविज्ञाने मुक्तिसाक्षिणी प्राणवाक् च सृष्टिसाक्षिणौ स्तः। सृष्टिसाक्षिणः प्रजापतेरभिप्रायेण– ''अयमात्मा वाङ्गमयः प्राणमयो मनोमयः''।

अत एव ''वाचा सृष्टिमसृजत्'' इत्यत्र वाक्पदेन मनः प्राणवचसां ग्रहणं भवति। अमृतमर्त्योरविनाभूतत्वात् वाचि अमृतभागः अमृतवाक् = दैवतसृष्टिः, मर्त्या वाक् भौतिकसृष्टिः। वाचा आकाशस्यापि बोधितत्वेन, वाचो द्विविधत्वेन आकाशोऽपि तथैव प्रथमो ऽमृताकाशः यस्योपनाम इन्द्रः। अत एव ''वागिन्द्रः'' इति कथ्यते द्वितीयस्तावन्मर्त्य आकाशः।

इमेव सर्वव्यापिकममृताकाशं आधुनिकाः ईथेरेति कथयन्ति। इन्द्र एव ईथर इत्येतेन इन्द्रामृतवाचः सर्वव्याप्तत्वाद् "नेन्द्रादृते पतते किंचनेत्रि ऋग्वेदोक्तिः संगच्छते। अस्मादेव इन्द्ररूपममृतवाण्याः दैवसृष्टिः समुत्पद्यते– तथाहि–

"इन्द्रज्येष्ठा देवा इन्द्रः सर्वा देवता"८

द्वितीयस्तावत् मर्त्याकाशः मर्त्या वाक् = भौतिकी सृष्टिः, यस्याः सर्वाणि भूतानि समुत्पद्यन्ते। अमृतवाचो देवताश्चोत्पद्यन्ते। तस्यैव प्रजापतेर्भूतत्वेन प्रजाद्वयम्। पिण्डीभूतयोः परस्परापेक्षत्वेन स्वयम्भू– परमेष्ठी– सूर्य– चन्द्रपृथिवी इति पञ्चपिण्डेषु मर्त्यवाचः समावेशः। एतेषां नाम सत्या वाक् सैव वेदवाक् निगद्यते–

वाचं देवा उपजिवन्ति विश्वे वाचं गन्धर्वा पशवो मनुष्याः।
वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी।।९

पञ्चपिण्डेषु पञ्चधा वाक् (मर्त्या–आभृणी–बृहती–आसुरी– अमृता–च) विद्यते। सैव वाक् पञ्चमण्डलेषु विभक्ता सती वाक्– श्लोक आपोलोक– ज्योतिर्लोक– सौम्यलोक– अग्निलोकादिरूपेण निगद्यते। तदित्थं मर्त्याकाशे ग्रन्थिवशाद् वायुरुत्पद्यते। सैव वायुः बन्धनेन अग्निर्भवति, अधिकबन्धाज्जलं भवति, अधिकतमबन्धेन च तज्जलं मृत्तिका अर्थात् पिण्डं जायते। एतत्सृष्टिक्रमं परिबोधयन्ती श्रुतिरपि ब्रवीति– यथाहि–

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवीति।" (तै.उ.)

**वाग्लोकविशेषाः–** "एषां वै भूतानां पृथ्वीरसः। पृथिव्या आपोऽपामोषधयः ओषधीनां पुष्पाणि पुष्पाणां फलानि। फलानां पुरुषः। पुरुषस्य रेतः"१०

अत्र पृथ्वी रसलोकः, चन्द्रोउमृतलोकः, परमेष्ठी अपां लोकः, तत्र वेद– लोक– नाडी– भूत– मनस्तत्त्वप्राण– रूपत्वेन प्रतिमण्डलान्तर्गतमहिमा– मण्डलानि पृथक्–पृथक् सन्ति। तेषां संक्षिप्तं स्वरूपं यथा– स्वयम्भूरित्यस्य वेदत्वेन (ब्रह्मनिश्वसितं वेदः) लोकत्वेन वाग्लोकः, नाडीत्वेन ऋतसत्ये पञ्चभूतत्वेनाकाशः, मनस्तत्त्वेन नियतिसूत्रं वेदः, वायुलोकः, ऊर्जस्वती– वायु– भृगु– अङ्गिरा अत्र पितरः सुराः। सूर्यस्य गायत्री मात्रिको वेदः, ज्योतिर्लोकः, तेजः, ज्योतिर्गौः, वायुः, देवाः।

चन्द्रमसः ब्रह्मवेदो वेदः, अमृतलोकः, श्रद्धा, जलं रेतो यक्षः, गन्धर्वश्च प्राणाः। पृथिवीत्यस्य यज्ञमात्रिको वेदः रसलोकः, सुषुम्णा, मृत्तिका, वाग्गौर्द्यौः मनुष्याः एवम्प्रकारेण पञ्चमण्डलानां सृष्टेः स्वरूपमेव विश्वम्। सृष्टेर्नियमने प्रसङ्गादत्र आत्मशब्दतत्त्वयोरुपस्थापनं क्रियते।

"यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानतः।
शिवं शान्तम् अद्वैतं चतुर्थं मन्यते स आत्मा स विज्ञेयः।।११

एतैः प्रामाण्यैर्वेदानां सर्वज्ञानमयत्वम् आत्मन्येव, एतेन सृष्टिसञ्चालने अस्यापि महती भूमिका वर्तते। उपायान्तरेण शाब्दिकसंचालनत्वस्यापि किंचिद्वर्णनं क्रियते। शब्दो हि परस्पराभिप्रायप्रकटनसाधनीभूतः। द्वैविध्येन शब्दस्योपन्यासः नित्यः अनित्यश्च। परमेश्वरज्ञाने निहिता ये शब्दा ते नित्यत्वेन स्वीक्रियन्ते। अन्ये च ये काल्पनिकाः तेऽनित्यपदेनैव। वेदेषु शब्दानां नित्यत्वमेव। वेदाङ्गीभूतव्याकरणशास्त्रेऽपि प्रक्रिया–निष्पादितसमस्तशब्दानां नित्यत्वं स्वतः स्पष्टम् यथोक्तं भर्तृहरिणा–

उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।१२

"ब्रह्मणा लोककर्त्रेण इति श्रुतिप्रामाण्यात् यथा ब्रह्मणि लोककर्तृत्वं तथैव शब्देऽपि लोकसञ्चालनत्वं विद्यते– तथाहि–

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।१३

"नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिप्रामाण्यात् ब्रह्मणि यथा आनन्दानुभूतिः भवति। तथैव वाक्व्यवहारमूलत्वाद् "शब्दतोऽपि आनन्दोत्पत्तिः जायते। "ब्रह्मणः प्रजा प्रजायन्ते" तथैव शब्दोत्पत्तेः वाक्व्यवहारो जन्यते। यदि शब्दो न स्यात् तदा जगतः सञ्चालनत्वं नोद्भवेत् व्यवहारे शब्दाश्रयत्वाद्। न हि शब्दमन्तरा कश्चन व्यवहारः संगच्छते। वाक्यपदीयकारेण शब्दब्रह्मणोरैक्यं प्रत्यपादि ब्रह्मकाण्डे। महाभाष्यानुसारेणापि स्फोटात्मा यश्शब्दः तदेव ब्रह्मेति ध्वन्यते। यथोपाधिभेदाद् कार्यब्रह्म– परब्रह्मेतिःरूपद्वयं तथैव शब्दस्यापि ध्वन्यात्म– स्फोटात्मकत्वेनःरूपद्वयम्। अत एव पाणिनेः प्रातिपदिकसंज्ञाविधायकं सूत्रं संगच्छते अन्यथा ध्वनिरूपात्मकस्य शब्दस्य तृतीयक्षणे विनाशशालित्वाद् सूत्रप्रणयनं व्यर्थं स्यादिति। अतः शब्दस्फोटार्थरूपेण समस्तं जगद् प्रकाशते तथाहि – "सर्वभूतान्तरचरः शब्दब्रह्मात्मको रविः" यथा ब्रह्मणि अनादिनिधनत्वं विलक्षणत्वं स्वगतभेदशून्यत्वं बोध्यते तथैव शब्देऽपि –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।१४

एतेन सृष्टिविज्ञाने शब्दब्रह्मणः तत्सञ्चालनत्वं ज्ञायते।

**ज्ञानविज्ञानसमन्वयः–** एतत्समन्वयेनैव ब्रह्मणः परिपूर्णता तज्ज्ञानं च जायेत। यथोक्तं हि–

स वै नैव रेम तस्मादेकाकी न रमते स द्वितीयमैच्छत्
स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवताम्।।१५

एकतोऽनेकं प्रति गमनं ज्ञानमनेकतः एकं प्रति गमनं विज्ञानमुच्यते। ध्येयम् अत्र भारतदेशः यावत्कालं विज्ञानयुक्तज्ञानस्योपासक आसीत् तावत् पर्यन्तममुक्त आसीत्, परं च यावत्कालं विज्ञानमुपेक्ष्य ज्ञानेनैव निर्वाहं साधितवान्, तावता कालेन देशस्य प्रगतिः केवलं भौतिकसाधनाधारिता आध्यात्मिकरूपेणावरुद्धा च।

ज्ञानस्याधिकरणमात्मैव ब्रह्मविज्ञानम्। पाश्चात्यभारतीयः केवलं भौतिकं ज्ञानमेवाङ्गीकृतं (आत्मज्ञानं तिरस्कृत्य) तेनैव अशान्तिरहर्निशं विवर्धते। यथोच्यते हि–

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- II, Issues-28, YEAR- April-June-2023

यद्दृश्यते दृष्टिरियं तु दृश्यप्रतिष्ठया ब्रह्मनिरूप्यते तत्,
विद्यात् संस्कार उदेति तस्माद् ज्ञानं यदेतां च वदन्ति वेदाः।।
य आस शब्दः स हि वेद उक्तो ज्ञानं यदस्मात् उदितं स वेदः।।[16]

**निष्कर्षः–** ''विद्या च तद्ब्रह्म यद् वेद व्यक्तं न तत् किंचिदिहास्ति वस्तु''

एतेन सर्वं खल्विदं ब्रह्मेति रीत्या ब्रह्मणि यज्ञः प्रतिष्ठितः यज्ञाधारे च ब्रह्म विकसितम्। योऽयं विद्याविभागः पाश्चात्त्ये फिजिक्स– केमेस्ट्री शब्दाभ्यां प्रसिद्धः सोऽयं विभागः विज्ञानकाण्डे ब्रह्मयज्ञशब्दाभ्यां प्रतिपादितः। येभ्यो हि मौलिकतत्त्वेभ्यो रासायनिकसम्मिश्रणद्वारा कश्चिदपूर्वो भावो निस्सरति सोऽयं यज्ञपदार्थः केमेस्ट्री। मौलिकतत्त्वसंघातश्च ब्रह्मपदार्थः ''फिजिक्ससंज्ञकः''। ज्ञानविज्ञानस्य विधाऽपि अपूर्वा। दर्शन– काव्य– मीमांसा– गणित– ज्योतिषः– भौतिकविज्ञान– आयुर्वेद– वनस्पतिविज्ञान– रसायनशास्त्र– छन्दः– अलङ्कारकोशेत्यादिषु क्षेत्रेषु साम्प्रतं वैज्ञानिकी प्रगतिरवलोक्यते। भौतिकविज्ञानस्य प्रणेत्रा मुनिना कणादेन स्वकीये वैशेषिकदर्शने निरूपितं यद् जगन्मूलं परमाणौ स्थितम्। सुविख्यात–रसायनाचार्येणापि

रसरत्नाकरे गन्धकेत्यस्य शोधविधिः प्रदर्शितः। वनस्पति–जीवविज्ञानस्यापि प्रगतिः वैदिककाले जाता। अथर्ववेदे विशेषौषधीनां प्रयोगः प्रगतेः संसूचकः। चिकित्साविज्ञानस्यापि आरम्भः ऋग्वेदादेव मन्यते। वैदिकसन्दर्भानुसारेण अस्याः सृष्टेः कर्तृत्वेन देवाः, संस्कृतेः संरक्षणेन च पितरः आदिकालतः प्रमुखाः सन्ति।

एतद्विवेचनेन प्रमाणान्तरेण वा सिध्यति यत् प्राच्यवैदिकविज्ञानमेव उपनिषत्विज्ञानस्य मूलत्वं सुदृढीकृतम्। पाश्चात्यनवीनयोः सम्मिश्रणमेव अस्माभिस्सर्वैः साम्प्रतं संधार्यते। सृष्टिकालादेव अद्यतनं यावत् कालक्रमेण व्याख्यारीतिः दिशा च परिवर्तते। मूलस्वरूपम् अद्यापि पृथक् पृथक् एव स्थितम्। यद्यपि एतद्विषये यथासमयं विचारक्रमः संजायते तथापि यथोक्तरीत्या प्रतिपादनं केवलं बिन्दुमादाय शोधसरणिमेव प्रशस्तीकरोति। विषयो हि इतोऽप्यधिकमवसरं भावयतीति दिक्।

संदर्भ ग्रंथ सूची

1. ऋग्वेद 10–129–1
2. कैवल्योपनिषद्–8–9
3. मनुस्मृति 201–3
4. मुण्डकोपनिषद्–3–1–3
5. श्वेताश्वेतरोपनिषद्–1–3
6. छान्दोग्योपनिषद्–6–2–1
7. बृहदारण्यकोपनिषद् 3–5–18
8. शत– 3–4, 2–2
9. तै– ब्रा– 2–8–8–4–5
10. शत– 14–9–4–1
11. शुक्लयजु– 40–7
12. प्रौढमनोरमा अजन्तपुल्लिङ्ग
13. काव्यमीमांसा राजशेखरप्रणीता
14. वाक्यपदीयम् भर्तृहरिप्रणीतम्
15. वृहदारण्यकोपनिषद्–1–4–3
16. वेदविद्याविमर्श मधुसूदन सरस्वती

*****